श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीहरिरायाचार्य विरचितम्

# ॥ श्रीकृष्णभुजङ्गप्रयाताष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीकृष्णभुजङ्गप्रयाताष्टकम् ॥

सदा गोपिकामण्डले राजमानं
लसन्नृत्यबन्धादिलीलानिदानम्।
गलद्दर्पकन्दर्पशोभाभिदानं
भजे नन्दसूनुं सदानन्दरूपम्॥ 1 ॥

व्रजस्त्रीजनानन्दसन्दोहसक्तं
सुधावर्षिवंशीनिनादानुरक्तम्।
त्रिभङ्गाकृतिं स्वीकृतस्वीयभक्तं
भजे नन्दसूनुं सदानन्दरूपम्॥ 2 ॥

स्फुरद्रासलीलाविलासातिरम्यं
परित्यक्तगेहादिदासैकगम्यम्।
विमानस्थिताशेषदेवादिनम्यं
भजे नन्दसूनुं सदानन्दरूपम्॥ 3 ॥

स्वलीलारसानन्ददुग्धोदमग्नं
प्रियस्वामिनीबाहुकण्ठैकलग्नम्।
रसात्मैकरूपाऽवबोधं त्रिभङ्गं
भजे नन्दसूनुं सदानन्दरूपम्॥ 4 ॥

रसामोदसम्पादकं मन्दहासं
कृताभीरनारीविहारैकरासम्।
प्रकाशीकृतस्वीयनानाविलासं
भजे नन्दसूनुं सदानन्दरूपम्॥ 5 ॥

जिताऽनङ्गसर्वाङ्गशोभाभिरामं
क्षपापूरितस्वामिनीवृन्दकामम्।
निजाधीनतावर्तिरामातिवामं
भजे नन्दसूनुं सदानन्दरूपम्॥ **6**॥

स्वसङ्गीकृतानन्तगोपालबालं
वृतस्वीयगोपीमनोवृत्तिपालम्।
कृतानन्तचौर्यादिलीलारसालं
भजे नन्दसूनुं सदानन्दरूपम्॥ **7**॥

धृताद्रीशगोवर्धनाधारहस्तं
परित्रातगोगोपगोपीसमस्तम्।
सुराधीशसर्वादिदेवप्रशस्तं
भजे नन्दसूनुं सदानन्दरूपम्॥ **8**॥

॥ इति श्रीकृष्णभुजङ्गप्रयाताष्टकं समाप्तम्॥